# Programme : Acharya (MA)

## Programme Outcomes

| Programme name | Programme Code | Programme Outcomes |
|---|---|---|
| **Acharya** | **A** | • स्वशास्त्रे गहनविषयप्रतिपादनसामर्थ्यम्।<br>• स्वशास्त्रे शास्त्रीयचिन्तनसामर्थ्यम् ।<br>• स्वशास्त्रे शास्त्रान्तरे च सिद्धान्तसाम्यवैषम्यावगमनसामर्थ्यम् ।<br>• स्वशास्त्रे अनुसन्धानप्रेरणाप्राप्तिः ।<br>• शास्त्रेषु अन्तस्सम्बद्धविषयाणां विषयवैविध्यस्य च अध्ययने सामर्थ्यम् ।<br>• भारतीयज्ञानविज्ञानशास्त्रपरम्परासंरक्षणे तत्परता । |
| **Programme Specific Name** | **Programme Specific Code** | **Programme Specific Outcomes** |
| **Acharya in Puranetihasa** | **A-PUR** | • पुराणेतिहाससिद्धान्तानां समग्रम् अध्ययनम्।<br>• पुराणेतिहाससिद्धान्तानां समर्थकयुक्तीनां परिपूर्णम् अध्ययनम्।<br>• पुराणेतिहाससिद्धान्तविरोधिपक्षाणाम् अन्वेषणम्।<br>• पुराणेतिहाससिद्धान्तविरोधिपक्षाणां मूलतः अध्ययनेन तेषां बलपरीक्षा।<br>• निष्पक्षपातवैखर्या पुराणेतिहाससिद्धान्तविरोधितत्त्वानां विवेचनम्।<br>• पुराणेतिहाससिद्धान्तमूलान्वेषणं, तत्र सम्भवतां सन्देहानां निरासः ।<br>• पुराणेतिहाससिद्धान्तमूलेषु यौक्तिकत्वचिन्तनम्।<br>• पुराणेतिहाससिद्धान्तमूलानां परसिद्धान्तमूलानां च विवेचनपूर्वकं समीक्षणम्। |

| 1st Semester | | |
|---|---|---|
| Course Code | Title of the Course | Course Outcomes |
| A-PUR 101 | श्रीमद्भागवतमाहपुराणम्<br>( प्रथकास्कन्धे 1-10 अध्यायाः)<br><br>अष्टादशपुराणपरिचयः पर्यालोचनं च | • तत्रादौ सूतशौनकसंवादप्रसङ्गे व्यासनारदप्रश्नोत्तरं पाण्डवचरित्रं राज्यत्यागपूर्वकं परीक्षतः गङ्गातीरे प्रायोपवेशनं शुकागमनम् इत्यादयः बहवः ज्ञातव्यविषयाः अस्मिन् पत्रे प्रतिपादिताः सन्ति ।<br>• वेदविहितार्थानां स्पष्टावबोधनाय पुराणमहत्त्वं पुराणवर्गीकरणं पुराणसङ्ख्यामाहात्म्यं पुराणानां संक्षिप्तविषयसारः इत्यादयः पुराणानां प्रमुखप्रयोजनविषयाःअस्मिन् पत्रे उल्लिखिताः सन्ति । तेन छात्राणां सामाजिकज्ञानवर्धनं भवति। |
| A-PUR 102 | वराहपुराणे श्रीवेङ्कटाचलक्षेत्रमाहात्म्यम्<br>(प्रथमो भागः) | • छात्राणां कृते भारतीय संस्कृतेः पूर्णज्ञानाय वेङ्कटाचलक्षेत्रस्य अनुशीलनं अत्यन्तावश्यकं निधाय अस्मिन् पत्रे विषयः प्रतिपादितो वर्तते।<br>• श्वेतवराहकल्पवृत्तान्तं श्रीवेङ्कटाचलस्थतीर्थानां वर्णनं कश्यपादिवंशानां विवरणं चोल्लेखितं वर्तते । |
| A-PUR 103 | श्रीमद्रामायणम्<br>( सुन्दरकाण्डे 1-20 सर्गाः) | • छात्राणां सामाजिकनैतिकावबोधनाय श्रीमद्रामायणस्य पूर्णज्ञानम् आवश्यकमस्ति।<br>• तत्रापि सुन्दरकाण्डं सनातनधर्मस्य रक्षाकवचं भवति। अतः तत्र सुन्दरकाण्डस्य संक्षिप्तपरिचयात् आरभ्य हनुमतः सीतान्वेषणेन सह सीताशोकवर्णनं यावत् अत्र ज्ञानं भवति। |
| A-PUR 104 | अग्निपुराणम्<br>( 1-20 अध्यायाः) | • विद्यार्थीनां कृते भारतीयसभ्यतायाः विशेषावगमनाय अग्निपुराणस्य आवश्यकता वर्तते। अतः अग्निपुराणसंक्षिप्तपरिचयात् आरभ्य सृष्टिवर्णेन सह श्रीकृष्णस्वम्भुकश्ययादिवंशानां विषयप्रतिपादनं कृतमस्ति अतः छात्राणाम् अग्निपुराणपठनेन सर्वाङ्गिकविकासः भवति। |
| A-PUR 105 | Soft Core | |

| 2nd Semester | | |
|---|---|---|
| **Course Code** | **Title of the Course** | **Course Outcomes** |
| A-PUR 201 | श्रीमद्भागवतमाहपुराणम् ( दशमस्कन्धे पूर्वार्धे 11-35 अध्यायाः) | • पुराणतिलकश्रीमद्भागवते दशमस्कन्धे छात्राणां बौधिकविकासाय अन्तस्सम्बन्धवर्धनाय च परिपूर्णावतारस्वरुपश्रीकृष्णस्य लीलायाः विषये वर्णितमस्ति।<br>• श्रीकृष्णस्य बाल्यलीलातः महारासलीलां यावत् विषयाः वर्णिताः सन्ति, अतः एतस्मिन् विषये ज्ञातुं शक्नुवन्ति। |
| A-PUR 202 | वराहपुराणे श्रीवेङ्कटाचलक्षेत्रमाहात्म्यम् (द्वितीयभागः) | • अखण्डकोटिब्रह्माण्डनायकस्य सच्चितान्दश्रीपुरुषोत्तमस्य कोटिकैवल्यनायकस्य श्रीजगन्नाथस्य निवासस्थानम् उत्कलप्रदेशस्थपुरुषोत्तमक्षेत्रम् विश्वविदितम् अस्य क्षेत्रस्य प्राशस्त्यं सारभूतत्वेन वर्णयति पुराणाग्रगण्यं स्कन्दपुराणम्।<br>• अतः छात्राणाम् अस्य क्षेत्रस्य वैशिष्टावगमनाय श्रीजगन्नाथलीलावबोधनाय आत्मविकासाय च शास्त्रमिदं योजितमस्ति। अत्र पुरुषोत्तमक्षेत्रमाहात्म्यतः विल्वेश्वरक्षेत्रमाहात्म्यं यावत् बहवः भावगर्भकविषयाः प्रतिपादिताः सन्ति। |
| A-PUR 203 | महाभारतम् ( शान्तिपर्वणि 1-30 अध्यायाः) | • "यदिहस्ति तदनान्यत्र यद न इह अस्ति न तत् क्वचित्" इति महाभारतवाक्यनुसारं छात्राणाम् इतिहासज्ञानसंपादनं भवति।<br>• आर्षपरम्परागौरवप्राप्त्यर्थं महाभारतसंक्षिप्तपरिचयादारभ्य युधिष्ठिरस्य शोकनिवारणं यावत् शान्तिपर्वनिगदिताः बहवः विषयाः उपपादिताः सन्ति। शान्तिपर्वण अध्ययनेन छात्राणां नैतिकसामाजिक- राजनैतिकज्ञानं च वर्धते। |
| A-PUR 204 | शिवमहापुराणम् ( विद्येश्वरसंहिता) | • भारतीयशिक्षायाः उद्देश्यं धर्मार्थकामानां विषये समानरुपेण समादारः। अतः छात्राणां धार्मिकशिक्षाप्रधानस्य आवश्यकतां निधाय पाठ्यक्रमेऽस्मिन् शिवपुराणान्तर्गतविद्येश्वरसंहितायाः नियोजनं कृतं वर्तते। शिवपुराणमहात्म्याद आरभ्य रुद्राक्षमहिमावर्णनपर्यन्तं वर्णितमस्ति। |
| A-PUR 205 | Soft Core | |

| 3rd Semester | | |
|---|---|---|
| Course Code | Title of the Course | Course Outcomes |
| A-PUR 301 | श्रीमद्भागवतमहापुराणम् ( दशमस्कन्धे उत्तरार्धे 50-75 अध्यायाः) | • समग्रजगति धर्मदूरीणां कृते दुर्लभग्रन्थत्वेन एषः भागवतग्रन्थः परिगण्यते। अतः छात्राणां मनसि आदिदैविक आदिभौतिक आध्यात्मिकादित्रितापनाशकश्रीमद्भागवतग्रन्थान्तगतिदशमस्कन्धस्य उत्तरार्धस्य नियोजनं कृतं वर्तते। |
| A-PUR 302 | विष्णुपुराणम् ( प्रथमांशः) | • वैष्णवानां प्रियम् इदं विष्णुपुराणं मानवाः जन्ममरणादिदुःखचतुरशीतिध्वनिषु भ्रमन्तः भवन्ति। अतः छात्राणां समग्रजगतः सृष्टिविषयकज्ञानवर्धनाय उदात्तमोक्षलक्ष्यप्रधानाय च पुराणस्यास्य नियोगः कृतो वर्तते। अतः अस्मिन् पाठ्यक्रमे विष्णुपुराणमाहात्म्यात् जगतः वर्णनं यावत् उट्टङ्कितं वर्तते। |
| A-PUR 303 | गर्गसंहिता ( गोलकखण्डः) | • सनातनसंस्कृतौ भगवद्भजनमेव अर्थात् भगवत्सेवनमेव श्रेयः इति सिद्धान्तितं वैयासकीन शुकेन भक्तिः भगवतः प्राणतोऽपि आधिका प्रिया वर्तते। अतः छात्राणां नैतिकतावर्धनाय प्रेमभक्तिजागरणाय च अलौकिकनायकस्य श्रीकृष्णस्य गूढतत्त्वयुक्ता गर्गसंहिता अस्मिन् पाठ्यक्रमे योजिता अस्ति। अत्र गर्गसंहितामाहात्म्यतः राधाकृष्णप्रेमवर्णनं यावत् वर्णितमस्ति । |
| A-PUR 304 | नारदभक्तिसूत्रम्, शाण्डिल्यभक्तिसूत्रम् ( प्रथमाध्यायः) | • सत्ययुगादौ ज्ञानवैराग्यमोक्षसाधनत्वेऽपि कलियुगे भक्तिरेव प्राधान्या अस्ति। भगवन्तं स्वानुकूलं कर्तुं षडरिपून् विजित्य परमाह्लादं प्राप्नुवन्ति वैष्णवाः। अतः छात्राणाम् अन्तःकरणशुद्ध्यर्थं नारदशाण्डिल्यादि महर्षिभिः प्रोक्तानां भक्तिगुणगरिम्णायुक्तानाम् उत्कृष्टसूत्राणां योजनं पाठ्यक्रमेऽस्मिन् कृतं वर्तते। |
| A-PUR 305 | Soft Core | |

| 4th Semester | | |
|---|---|---|
| **Course Code** | **Title of the Course** | **Course Outcomes** |
| A-PUR 401 | श्रीमद्भागवतमहापुराणम्<br>( एकादशस्कन्धे 1-25 अध्यायाः) | • पुराणदर्पणश्रीमद्भागवतपुराणानुसारं मुक्तेः प्रधानसाधनानि त्रीणि भवन्ति यथा निष्कामकर्म ध्यानं शान्तिः च। मानवस्य परमलक्ष्यं भवति मोक्षप्राप्तिः।<br>• अतः छात्राणां कृते जीवन्मुक्तिलक्ष्यनिर्माणाय श्रीमद्भागवतपुराणान्तर्गतस्य एकादशस्कनधस्य नियोजनं कृतं वर्तते। अत्र यदुवंशशापात् आरभ्य साङ्ख्ययोगप्रसङ्गं यावत् निरुपितमस्ति। |
| A-PUR 402 | स्कन्धपुराणम्<br>( उत्कलखण्डे 1-22 अध्यायाः) | • अखण्डकोटिब्रह्माण्डनायकस्य सच्चितानन्दश्रीपुरुषोत्तमश्य कोटिकैवल्यनायश्य श्रीजगन्नाथस्य निवासस्थानम् उत्कलप्रदेशस्थपुरुषोत्तमक्षेत्रम् विश्वविदितम्। अस्य क्षेत्रस्य प्राशस्त्यं सारभूतत्वेन वर्णयति पुराणाग्रगण्यं स्कन्दपुराणम्।<br>• अतः छात्राणां अस्य क्षेत्रस्य वौशिष्टावगमनाय श्रीजगन्नाथलीलावबोधनाय आत्मविकासाय च शास्त्रमिदं योजितमस्ति। अत्र पुरुषोत्तक्षेत्रमाहात्म्यतः विल्वेश्वरक्षेत्रमाहात्म्यं यावत् वहबः भावगर्भकविषयाः प्रतिपादिताः सन्ति। |
| A-PUR 403 | श्रीमद्देवीभागवतम्<br>( तृतीयस्कन्धे 1-30 अध्यायाः) | • "महामाया विश्वं भ्रामयति" वचनानुसारं भगवत्याः देव्याः प्रति इति इति चराचरविश्वे प्रतिभाति। ब्रह्माण्डोत्पत्तिप्रसङ्गे शक्तिं विना किमपि न सम्भव्यते। अतः छात्राणां शाक्तपरम्परायाः ज्ञानवर्धनाय शीलरक्षणाय तामसगुणनाशाय च देवीभागवतपुराणान्तर्गतस्य तृतीयांशस्य नियोजनं कृतं वर्तते ।<br>• अत्र व्यासनारदयोः संवादतः काशीप्रदेशे दुर्गादेव्याः प्रतिष्ठानं यावत् वर्णितमस्ति। |
| A-PUR 404 | कल्किपुराणम्<br>( 1-35 अध्यायाः) | • महापुराणम् उपपुराणम् औपपुराणम् इत्येवं प्रकारेण पुराणानि विभक्तानि। पुराणवाङ्मये उपपुराणानामापि प्राधान्यं वर्तते।<br>• तत्र उपपुराणेषु लोककल्याणाय सर्वजनहिताय च कल्किपुराणस्य प्राधान्यं वर्तते। कलियुगे मानवः प्रत्येकविषयेषु स्वात्मसाक्षात्कारेण स्वजीवनस्य निर्वहनं करिष्यति तदर्थं पाठ्यक्रमे प्रसङ्गोऽयं नियुक्तोऽस्ति। अत्र कल्किपुराणमाहात्म्यतः चक्रयागवर्धनं यावत् वर्णितमस्ति। |
| A-PUR 405 | Soft Core | |